Shri Shailaputrim Namamyaham aShTakam

श्रीशैलपुत्रीं नमाम्यहम् अष्टकम्

Document Information

Text title : Shri Shailaputrim Namamyaham aShTakam

File name : shailaputrIMnamAmyahamaShTakam.itx

Category : devii, devI, pradIptakumArananda, otherforms, aShTaka, navadurgA

Location : doc_devii

Author : (Copyright) Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

Transliterated by : Pradipta Kumar Nanda pknanda65 at gmail.com

Proofread by : Pradipta Kumar Nanda

Acknowledge-Permission: (Copyright) Pradipta Kumar Nanda

Latest update : October 14, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 14, 2026

sanskritdocuments.org

Shri Shailaputrim Namamyaham aShTakam

श्रीशैलपुत्रीं नमाम्यहम् अष्टकम्

हिमाद्रिशिखरासीनां शशिखण्डविभूषिताम् ।
त्रिनेत्रां वृषभारूढां वन्दे शैलसुतां शिवाम् ॥ १॥

दिव्यदेहसमायुक्तां त्रिशूलकमलान्विताम् ।
करुणामृतसम्पूर्णां भक्ताभीष्टफलप्रदाम् ॥ २॥

रक्ताम्बरधरां देवीं मुक्ताहारविभूषिताम् ।
सर्वमङ्गलमाङ्गल्यां शैलपुत्रीं नमाम्यहम् ॥ ३॥

उद्यद्भानुसहस्राभां तेजःपुञ्जस्वरूपिणीम् ।
सर्वविघ्नहरां दुर्गां ध्यायामि परमेश्वरीम् ॥ ४॥

प्रकृतिं परमां शक्तिं शिवसङ्कल्परूपिणीम् ।
भुक्तिमुक्तिप्रदां देवीं वन्दे गौरीं यशस्विनीम् ॥ ५॥

वृषगमनसुशीलां शैलराजस्य पुत्रीं
त्रिशिखकरविराजां चन्द्रलेखावतंसाम् ।
कनकनिभसुवस्त्रां पद्महस्तां त्रिनेत्रां
जननसुखकरीं तां शैलपुत्रीं भजामि ॥ ६॥

करुणरसतरङ्गां भक्तचित्तैकवेद्यां
सकलभयविनाशां सिद्धिसौभाग्यदात्रीम् ।
अमितविभवयुक्तां दिव्यतेजःप्रपूर्णां
हृदयकमलमध्ये शैलपुत्रीं स्मरामि ॥ ७॥

दिव्यां दिव्यविभूषणां त्रिजगतां मातुः स्वरूपात्मिकां
रक्ताम्भोजसमानकान्तिवदनां कारुण्यपूर्णेक्षणाम् ।
भक्ताभीष्टफलप्रदां भगवतीं संसारदुःखापहां
वन्दे नन्दितदेववृन्दविनुतां दुर्गां शिवां शैलजाम् ॥ ८॥

इति प्रदीप्तनन्दशर्मविरचितं श्रीशैलपुत्रीं नमाम्यहं नामाष्टकं सम्पूर्णम् ।

Composed, encoded, and proofread by
Dr. Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

Shri Shailaputrim Namamyaham aShTakam
pdf was typeset on October 14, 2026

Please send corrections to *sanskrit@cheerful.com*